बंहकः-हिका, बंहकः-हिका, बिबंहिषकः-षिका, बाबंहकः-हिका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककण्ठतिवत् (149) ज्ञेयानि [1]बहु। शानचि-बंहमानः इति रूपमस्येति ज्ञेयम्।

(1110) "**बाडृ आप्लाव्ये**" (I-भ्वादिः-286. सक. सेट्. आत्म.)

आप्लाव्यम्=वेगेनोत्क्षिप्य गमनम्। ओष्ठ्यादिरयं धातुः। औत्तराः सर्वेऽपि ग्रन्थकाराः वबयोः प्रयोगं बहुधा विपर्यस्य कुर्वन्ति।

बाडकः-डिका, बाडकः-डिका, बिबाडिषकः-षिका, बाबाडकः-डिका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकगाधतिवत् (394) ज्ञेयानि। [A]बाडितम्, [2]बाडः।

(1111) "**बाधृ लोडने**" (I-भ्वादिः-5. सक. सेट्. आत्म.)

'—**रोटने**। **रोटनम्**=प्रतिघातः।' इति **क्षीरस्वामी**। **लोडनम्**= हिंसनमिति यावत्।

बाधकः-धिका, बाधकः-धिका, बिबाधिषकः-षिका, बाबाधकः-धिका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकगाधतिवत् (394) ज्ञेयानि। [3]कार्यबाधी[B]।

(1112) "**बाहृ प्रयत्ने**" (I-भ्वादिः-645. अक. सेट्. आत्म.)

बाहकः-हिका, बाहकः-हिका, बिबाहिषकः-षिका, बाबाहकः-हिका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकद्राखतिवत् (879) ज्ञेयानि। [4]बाहः-[C]बाहा, [5]बाढम्[D]-बाहितम्, [6]बाहुः।

---

1. 'लङ्घिबंह्योर्नलोपश्च' (द. उ. 1-114) इति कुप्रत्यये नकारलोपे च **बहु** इति रूपम्।
2. बाडते=वेगेनोत्क्षिप्य गच्छतीति **बाडः**= अश्वः। पचाद्यचि रूपम्।
3. 'सुप्यजातौ णिनिस्ताच्छील्ये' (3-2-78) इति णिनिप्रत्ययः।
4. पचाद्यचि, रूपमेवम्। स्त्रियामजादिपाठात् टाप्।
5. 'क्षुब्धस्वान्तध्वान्तलग्नम्लिष्टविरिब्धफाण्ट**बाढानि** मन्थमनस्तमस्सक्ताविस्पष्टस्वरानायास**भृशेषु**' (7-2-18) इत्यनेनास्माद् धातोर्निष्ठायां भृशार्थे इडभावनिपातनात्, धातुहकारस्य ढत्वे धत्व-ष्टुत्व-ढलोप-दीर्घेषु च **बाढम्** इति रूपम्। अन्यत्र **बाहितम्** इत्येव।
6. बाहते=प्रयतते इति **बाहुः**=करः। औणादिके उप्रत्यये रूपमेवम्।

A. 'अहोडनीयान् पशुपालयानसौ अपश्यदानन्दपयोधि**बाडितः**।' धा. का. 1.38.
B. 'स गान्दिनीभूरथ गोकुलेधितं स्पर्धालुधीगाधित**कार्यबाधिनम्**।' धा.का. 1.2.
C. 'प्लीहायिताघुरभरक्षतिवेहितोर्वीभैषज्यजेहपरया निज**बाहयैव**॥' धा. का. 1.81.
D. 'प्रमेदिताः सपुत्रास्ते सुस्वान्ता **बाढ**विक्रमाः।' भ. का. 9.17.